**PERIODIC ASSESSMENT-1-ASSIGNMENT**

**SANSKRIT-GRADE-7**

प्र–१ अधोलिखितान् गद्यांशान् पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–

रामायणम् महाभारतम् च द्वे महाकाव्ये संस्कृत-साहित्यस्य। एतौ ग्रन्थौ भारतीय-संस्कृतेः आधारस्तम्भौ। आदिकाव्यं रामायणम् ऋषेः वाल्मीकेः रचना अस्ति। इदम् काव्यम् अष्टेषु अध्यायेषु वर्तते। ऋषिः वाल्मीकिः आदिकविः कथ्यते । महाभारतस्य रचयिता ऋषिः वेदव्यासः । महाभारतं नाम महाकाव्यम्। विश्व-कोषः इति कथ्यते। 'यत् इह अस्ति न तत् अन्यत्र' इति मन्यते । अयं ग्रन्थः शतसहस्र-श्लोकेषु निबद्धः। विश्व-प्रसिद्ध श्रीमद्भगवद्गीता अस्य महाकाव्यस्य अंशः अस्ति। गीतायाम् श्रीकृष्णः अर्जुनाय उपदिशति-'कर्तव्य-भावेन स्वकर्तव्यं कुरु, कर्म-फलस्य आशाम् मा कुरु'। एषः उपदेशः जनानां हितकरः।।

I. एकपदेन उत्तरत।

1. रामायणं कस्य रचना ?
2. ऋषिः वेदव्यासः कस्य रचयिता ?
3. कः आदिकविः कथ्यते ?
4. किं नाम महाकाव्यं विश्वकोषः कथ्यते ?

उत्तरम्:

1. ऋषिवाल्मीके:
2. महाभारतस्य
3. वाल्मीकिः
4. महाभारतम्

II. एकवाक्येन उत्तरत।

श्रीकृष्णः अर्जुनाय किम् उपदिशति ?

उत्तरम्:श्रीकृष्णः अर्जुनाय उपदिशति-कर्तव्यभावेन स्वकर्तव्यं कुरु, कर्मफलस्य आशा मा कुरु इति।

III. 1. एषः उपदेश:–अत्र किं विशेषणम्?

2. यथानिर्देशम् उत्तरत।

(क) कुरु = ..................... धातुः, ...................... लकारः, ...................... पुरुषः, ...................... वचनम्।

(ख) ऋषेः = ..................... विभक्तिः ..................... वचनम्।

3. बहुवचनम् लिखत-

(क) कुंरु (ए०व०) = ...................... बहुवचनम्।

(ख) स्वकर्त्तव्यम् (ए०व०) = ...................... बहुवचनम्

4. पर्यायम् लिखत

(क) रचितः ......................

(ख) लेखकः- ......................

उत्तरम्:

1. एषः

2. (क) कृ, लोट्, मध्यमः, एक.

(ख) षष्ठी, एक

3. (क) कुरुत

(ख) स्वकर्तव्याणि

4. (क) निबद्धः

(ख) रचयिता

IV. 'गीतायाम् श्रीकृष्णः अर्जुनाय उपदिशति' इति वाक्ये कर्तृपदम् किम्?

(गीतायाम्, श्रीकृष्णः, अर्जुनाय)

उत्तरम्:श्रीकृष्णः

4. नदी-तीरे अस्ति एकः वट-वृक्षः। एकः अल्पज्ञः बालकः तस्य छायायाम् उपविष्टः। पश्यतिएकस्याम् लतायाम् विशालानि कालिन्द-फलानि सन्ति । सः चिन्तयति-अहो विचित्रम्! सुकोमलायाम् लतायाम् दीर्घानि फलानि, विशाले वट-वृक्षे च लघूनि पुष्पाणि सन्ति । नूनम् एव ईश्वरः मन्दमतिः मूर्खः च। एवम् चिन्तयन् सः वृक्षस्य अधः तिष्ठति स्म। तदैव एकम् सुकोमलम् पुष्पम् तस्य शिरसि पतति। सः विचारयति-यदि एतस्मिन् वृक्षे विशालम् फलम् स्यात् तर्हि अद्य मे शीर्षम् भग्नम् भवेत्। सौभाग्येन अहम् सकुशलः अस्मि। ईश्वरः यत् करोति शोभनं करोति। ननु मूर्खः अहम्, न तु ईश्वरः।

I. एकपदेन उत्तरत।।

1. वटवृक्षः कुत्र अस्ति?

2. विशालानि फलानि कस्याम् सन्ति ?

3. वटवृक्ष कीदृशानि पुष्पाणि?

4. बालकः कीदृशः अस्ति?

उत्तरम्:

1. नदीतीरे

2. लतायाम्

3. लघूनि

4. अल्पज्ञः

II. एकवाक्येन उत्तरत

अन्ततः बालकस्य ईश्वरविषये किं मतम् ?

उत्तरम्:

अन्ततः बालकस्य ईश्वरविषये इदं मतम् 'ईश्वरः यत् करोति शोभनं करोति'। |

III. यथानिर्देशम् उत्तरत।

1. 'दीर्घानि फलानि'–अत्र किं विशेषणम्?

2. (क) भवेत् = ...................... धातुः, ...................... लकारः, ...................... पुरुषः, ...................... वचनम्

(ख) लतायाम् = ...................... विभक्तिः ...................... वचनम्।

(ग) तदा + एव = ......................

3. बहुवचने परिवर्त्य लिखत

(क) विशालम् फलम् = ......................

(ख) एतस्मिन् वृक्षे = ......................

(ग) अहम् मूर्खः = ......................

उत्तरम्:

1. दीर्घानि

2. (क) भू, विधिलिङ, प्रथमः, एक

(ख) सप्तमी, एक

(ग) तदैव

3. (क) विशालानि फलानि

(ख) एतेषु वृक्षेषु

(ग) वयम् मूर्खाः

IV. 'नदीतीरे अस्ति एकः वट-वृक्षः, इति वाक्ये 'अस्ति' क्रियापदस्य कर्ता कः?

(i) नदीतीरे

(ii) एकः

(iii) वटवृक्षः

उत्तरम्:वटवृक्षः

(3) गङ्गा देशस्य प्रमुखा नदी। गङ्गायाः अपरं नाम भागीरथी। एषा नदी हिमालयात निर्गच्छति। एतस्यां नद्याः तीरे बहवः तीर्थाः मुनीनाम आश्रमाः च सन्ति। हरिद्वार नगरम प्रसिद्धं तीर्थस्थानम गगानद्याः तटम अलंकरोति। अत्र अनेकेः देवालयः सन्ति। सायंकालस्य दृश्यम तु अत्र अनुपमम एव। भक्ताः गंगादेवीं श्रद्धया पूजयन्ति, प्रज्वलितान

दीपान च नद्याः जले प्रवाहयन्ति। यदा प्रज्वलिताः दीपाः जलेषु तरन्ति, तदा एवं प्रतीयते यत ताराणां समूहः आकाशात अवतीर्य पृथिव्याम आगतः। गंगानदी परम पावना नदी मन्यते।

(1)- एकपदेन उतरत -

क- देशस्य प्रमुखा नदी का? - गंङ्गा

ख- एषा नदी कस्मात पर्वतात निर्गच्छिति? - हिमालयात

ग- भक्ताः गंङ्गा नदी कथम पूजयन्ति? - श्रद्धया पूजयन्ति

(2)-वाकयनिर्माण कुरुत-

क- नदी - गंङ्गा नदी हिमालयात निर्गच्छति

ख- हिमालय - हिमालये निर्झराणाम सरितानाम च कलकल स्वरः गुजति

## रचनात्मक कार्यम

**प्र-२-अ- मञ्जुषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

( षड, एकत्रिंशत, त्रिशंत, द्वादश, अष्टाविंशति, द्वो )

क-फरवरी मासे सामान्यतः अष्टाविंशति अष्टाविंशति -दिनानि भवन्ति।

ख-मम शरीरे द्वो हस्तौ स्तः।

ग- षड ऋतवः भवन्ति।

घ-मासाः द्वादश भवन्ति।

ङ-एकस्मिन मासे त्रिशंत अथवा एकत्रिंशत दिवसाः भवन्ति।

**ब- मञ्जुषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

( अभिनन्दति भक्षयिष्यामः इच्छामि वदिष्यामि उडडीयते प्रतिवसति स्म )

क-हंसाभ्यां सह कूर्मो पि उडडीयते।

ख-अहं किञ्चिदपि न वदिष्यामि।

ग-यः हितकामानां सुहदां वाक्यं न अभिनन्दति ।

घ-एकः कूर्मः अपि तत्रैव प्रतिवसति स्म।

ङ-अहम आकाशमार्गेण अनयत्र गन्तुम इच्छामि।

च-वयं गृहं नीत्वा कूर्मं भक्षयिष्यामः ।

## व्याकरण

**प-३-अधोलिखतपदेषु धातवः के सन्ति?**

| पदम | धातुः |
|---|---|
| क- करोति | कृ |
| ख- पश्य | दृश |
| ग- भवेत | भू |
| घ- तिष्ठति | स्था |
| ङ- प्रतिष्ठितम | स्था |

**प्र-४-मञ्जुषातः पदानि चित्वा लिङ्गानुसारं लिखत-**

( रत्नानि, वसुन्धरा, सुखी, अन्नम, रविः, सत्येन, बह्निः, पृथ्वी, संगतिम )

| **पुँलिङ्गम** | **स्त्रीलिङ्गम** | **नपुंसकलिङ्गम** |
|---|---|---|
| सुखी | वसुन्धरा | रत्नानि |
| बह्निः | पृथ्वी | सत्येन |
| रविः | संगतिम | अन्नम |

## साहित्य

**प्र-५- एकपदेन उतरत लिखत-**

| | |
|---|---|
| क-सरस्तीरे के आगच्छन? | धीवराः |
| ख-लोके वशीकृतिः का? | क्षमा |
| ग-कूर्मस्य किं नाम आसीत? | कम्बुग्रीवः |
| घ-कूर्म केन मार्गेण अन्यत्र गन्तुम इच्छति? | आकाशमार्गेण |
| ङ-पृथिवी केन धार्यते? | सत्येन |
| च-कः सत्येन तपते? | रविः |
| छ-सर्वं कस्मिन प्रतिष्ठितम ? | सत्ये |
| ज-लम्बमानं कूर्मं दृष्टवा के अधावन? | पौराः |
| झ-पृथिव्यां कति रत्नानि? | त्रीणि |
| ञ-मूढैः कुत्र रत्नसंज्ञा विधीयते? | पाषाणखण्डेषु |
| ट-कैः संङ्गतिं कुर्वीत? | स्द्भिः |

------------------------------------------------------------------------